# सुन्दरकाण्ड द्वितीय सर्गः (२) -॥ लंका प्रवेशः ॥

स सागर मनाधृष्य मतिक्रम्य महाबलः ।
त्रिकूट शिखरे लङ्कां स्थितां स्वस्थो ददर्श ह ॥ १ ॥

ततः पादप मुक्तेन पुष्प वर्षेण वीर्यवान् ।
अभिवृष्टः स्थितस्तत्र बभौ पुष्पमयो यथा ॥ २ ॥

योजनानां शतं श्रीमांस् तीर्त्वाप्युत्तम विक्रमः ।
अनिःश्वसन् कपिस्तत्र न ग्लानि मधिगच्छति ॥ ३ ॥

शतान्यहं योजनानां क्रमेयं सुबहून्यपि ।
किं पुनः सागरस्यान्तं सङ्ख्यातं शत योजनम् ॥ ४ ॥

स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः ।
जगाम वेगवाँल्लङ्कां लङ्घयित्वा महोदधिम् ॥ ५ ॥

शाद्वलानि च नीलानि गन्धवन्ति वनानि च ।
गण्डवन्ति च मध्येन जगाम नगवन्ति च ॥ ६ ॥

शैलांश्च तरुसञ्छन्नान् वनराजीश्च पुष्पिताः ।
अभिचक्राम तेजस्वी हनूमान् प्लवगर्षभः ॥ ७ ॥

स तस्मिन्नचले तिष्ठन्वनान् युपवनानि च ।
स नगाग्रे च तां लङ्कां ददर्श पवनात्मजः ॥ ८ ॥

सरलान् कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् ।
प्रियालान्मुचुलिन्दांश्च कुटजान् केतकानपि ॥ ९ ॥

प्रियङ्गून् गन्ध पूर्णांश्च नीपान् सप्तच्छदांस्तथा ।
असनान् कोविदारांश्च करवीरांश्च पुष्पितान् ॥ १० ॥

पुष्पभार निबद्धांश्च तथा मुकुलितानपि ।
पादपान्विहगा कीर्णान् पवनाधूत मस्तकान् ॥ ११ ॥

हंस कारण्ड वाकीर्णाः वापीः पद्मोत्पलायुताः ।
आक्रीडान्विविधान्रम्यान्विविधांश्च जलाशयान् ॥ १२ ॥

सन्ततान् विविधैर् वृक्षैः सर्वर्तु फल पुष्पितैः ।
उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः ॥ १३ ॥

समासाद्य च लक्ष्मीवाँल्लङ्कां रावण पालिताम् ।
परिखाभिः सपद्माभिः सोत्पलाभि रलङ्कृताम् ॥ १४ ॥

सीतापहर णार्थेन रावणेन सुरक्षिताम् ।
समन्ताद् विचरद्भिश्च राक्षसै रुग्र धन्विभिः ॥ १५ ॥

काञ्चने नावृतां रम्यां प्राकारेण महापुरीम् ।
गृहैश्च ग्रहसङ्काशैः शारदाम्बुद सन्निभैः ॥ १६ ॥

पाण्डराभिः प्रतोलीभि रुच्चाभि रभिसंवृताम् ।
अट्टालक शताकीर्णां पताका ध्वज मालिनीम् ॥ १७ ॥

तोरणैः काञ्चनैर् दिव्यैर्लता पङ्क्ति विचित्रितैः ।

ददर्श हनुमाँल्लङ्कां दिवि देवपुरीमिव ॥ १८ ॥

गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः ।

ददर्श स कपिश्रेष्ठः पुरमाकाशगं यथा ॥ १९ ॥

पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा ।
प्लवमाना मिवाकाशे ददर्श हनुमान् कपिः ॥ २० ॥

वप्र प्राकार जघनां विपुलाम्बु नवाम्बराम् ।
शतघ्नीशूल केशान्ता मट्टालक वतंसकाम् ॥ २१ ॥

मनसेव कृतां लङ्कां निर्मितां विश्वकर्मणा ।
द्वार मुत्तर मासाद्य चिन्तयामास वानरः ॥ २२ ॥

कैलास शिखर प्रख्या मालिखन्ती मिवाम्बरम् ।
डीयमाना मिवाकाश मुच्छ्रितैर् भवनोत्तमैः ॥ २३ ॥

सम्पूर्णां राक्षसै र्घोरै र्नागैर् भोगवतीमिव ।
अचिन्त्यां सुकृतां स्पष्टां कुबेराध्युषितां पुरा ॥ २४ ॥

दंष्ट्रिभिर्बहुभिः शूरैः शूल पट्टिस पाणिभिः ।
रक्षितां राक्षसैर्घोरैर्गुहा माशीविषै रिव ॥ २५ ॥

तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः ।
रावणं च रिपुं घोरं चिन्तयामास वानरः ॥ २६ ॥

आगत्यापीह हरयो भविष्यन्ति निरर्थकाः ।
नहि युद्धेन वै लङ्का शक्या जेतुं सुरैरपि ॥ २७ ॥

इमां तु विषमां दुर्गां लङ्कां रावण पालिताम् ।
प्राप्यापि स महाबाहुः किं करिष्यति राघवः ॥ २८ ॥

अवकाशो न सान्त्वस्य राक्षसेष्वभिगम्यते ।
न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ॥ २९ ॥

चतुर्णामेव हि गति र्वानराणां महात्मनाम् ।
वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥ ३० ॥

यावज्जानामि वैदेहीं यदि जीवति वा नवा ।
तत्रैव चिन्तयिष्यामि दृष्ट्वा तां जनकात्मजाम् ॥ ३१ ॥

ततः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ।
गिरिशृङ्गे स्थितस् तस्मिन् रामस्याभ्युदये रतः ॥ ३२ ॥

अनेन रूपेण मया न शक्या रक्षसां पुरी ।
प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बल समन्वितैः ॥ ३३ ॥

उग्रौजसो महावीर्या बलवन्तश्च राक्षसाः ।
वञ्चनीया मया सर्वे जानकीं परिमार्गता ॥ ३४ ॥

लक्ष्या लक्ष्येण रूपेण रात्रौ लङ्कापुरी मया ।
प्रवेष्टुं प्राप्तकालं मे कृत्यं साधयितुं महत् ॥ ३५ ॥

तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः ।
हनूमांश् चिन्तयामास विनिश्वस्य मुहुर्मुहुः ॥ ३६ ॥

केनोपायेन पश्येयं मैथिलीं जनकात्मजाम् ।
अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ ३७ ॥

न विनश्येत्कथं कार्यं रामस्य विदितात्मनः ।
एकामेकश्च पश्येयं रहिते जनकात्मजाम् ॥ ३८ ॥

भूताश्चार्था विपद्यन्ते देशकाल विरोधिताः ।
विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३९ ॥

अर्थानर्थान्तरे बुद्धिर् निश्चिताऽपि न शोभते ।
घातयन्ति हि कार्याणि दूताः पण्डित मानिनः ॥ ४० ॥

न विनश्येत् कथं कार्यं वैक्लव्यं न कथं भवेत् ।
लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ४१ ॥

मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः ।
भवेद् व्यर्थमिदं कार्यं रावणानर्थ मिच्छतः ॥ ४२ ॥

न हि शक्यं क्वचित्स्थातु मविज्ञातेन राक्षसैः ।
अपि राक्षस रूपेण किमु तान्येन केनचित् ॥ ४३ ॥

वायुरप्यत्र नाज्ञातश् चरेदिति मतिर्मम ।
न ह्यस्त्यविदितं किञ्चिद् राक्षसानां बलीयसाम् ॥ ४४ ॥

इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः ।
विनाश मुपयास्यामि भर्तुरर्थश्च हीयते ॥ ४५ ॥

तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः ।
लङ्कामधि पतिष्यामि राघवस्यार्थ सिद्धये ॥ ४६ ॥

रावणस्य पुरीं रात्रौ प्रविश्य सुदुरासदाम् ।
विचिन्वन्भवनं सर्वं द्रक्ष्यामि जनकात्मजाम् ॥ ४७ ॥

इति सञ्चिन्त्य हनुमान् सूर्यस्यास्तमयं कपिः ।
आचकाङ्क्षे तदा वीरो वैदेह्या दर्शनोत्सुकः ॥ ४८ ॥

सूर्ये चास्तं गते रात्रौ देहं सङ्क्षिप्य मारुतिः ।
वृषदंशकमात्रः सन्बभू वाद्भुत दर्शनः ॥ ४९ ॥

प्रदोषकाले हनुमांस् तूर्णमुत्प्लुत्य वीर्यवान् ।
प्रविवेश पुरीं रम्यां सुविभक्त महापथाम् ॥ ५० ॥

प्रासाद माला विततां स्तम्भैः काञ्चन राजतैः ।
शात कुम्भमयैर् जालैर् गन्धर्व नगरोपमाम् ॥ ५१ ॥

सप्त भौमाष्ट भौमैश्च स ददर्श महापुरीम् ।
तलैः स्फटिक सङ्कीर्णैः कार्तस्वर विभूषितैः ॥ ५२ ॥

वैडूर्य मणि चित्रैश्च मुक्ताजाल विभूषितैः ।
तलैः शुशुभिरे तानि भवनान् यत्र रक्षसाम् ॥ ५३ ॥

काञ्चनानि विचित्राणि तोरणानि च रक्षसाम् ।
लङ्कामुद्द्योतया मासुः सर्वतः समलङ्कृताम् ॥ ५४ ॥

अचिन्त्या मद्भुताकारां दृष्ट्वा लङ्कां महाकपिः ।
आसीद् विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥ ५५ ॥

स पाण्डु रोद्विद्ध विमान मालिनीं
महार्ह जाम्बूनद जाल तोरणाम् ।
यशस्विनीं रावण बाहु पालितां
क्षपाचरै र्भीम बलैः समावृताम् ॥ ५६ ॥

चन्द्रोऽपि साचिव्य मिवास्य कुर्वं-
-स्तारागणैर् मध्यगतो विराजन् ।
ज्योत्स्ना वितानेन वितत्य लोकम्
उत्तिष्ठते नैक सहस्र रश्मिः ॥ ५७ ॥

शङ्खप्रभं क्षीर मृणाल वर्णम्
उद्गच्छमानं व्यवभास मानम् ।
ददर्श चन्द्रं स हरि प्रवीरः
पोप्लूयमानं सरसीव हंसम् ॥ ५८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥